Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# संस्कृतकथासाहित्ये नीतिकथासाहित्यानां समीक्षणम्

प्रदीपकुमारपाण्डेयः
शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम्

**Article Info**
Volume 6, Issue 6
**Page Number :** 200-204
**Publication Issue :**
November-December-2023
**Article History**
Accepted : 10 Dec 2023
Published : 30 Dec 2023

**शोधसारांशः-** संस्कृतकथासाहित्यपरम्परायाम् इतिहासमवलोकयामश्चेत् कथाभिः समाजे जीवनस्य परिस्थितीनामनुसारेण मूल्यानां संवर्धनं सम्प्रसारणं क्रियते। अद्य सर्वत्र समाजे सर्वासु दिक्षु नैतिक-सामाजिक-शैक्षिक-सांस्कृतिक आध्यात्मिकमूल्येषु क्षयः अवलोक्यते। अस्य क्षयस्य दुष्परिणामः शिक्षाक्षेत्रेऽपि दृश्यते। अत एव शिक्षानीतिकाराः पाठ्यक्रमे पाठ्यचर्यायां च मूल्यसंवर्धनपराः कथाः बालानां सुखबोधाय, हितोपदेशाय च प्राचीनसंस्कृतिबोधकाः नीतिकथाः योजयितुं शिक्षाविदः प्रेरयन्ति।

**मुख्यशब्दाः –** भाषा, संस्कृतभाषा, भारतीयसंस्कृतिः, मानवमूल्यानि, साहित्यविधाः, कथासाहित्यम्, कथोत्पत्तिः, कथायाः स्वरूपम्, नीतिकथा, कथातत्त्वानि, सरलसंस्कृतकथा, शैक्षिकतत्त्वानि, नीतिकथायाः वैशिष्ट्यम्, कथागतमूल्यानि, पञ्चतन्त्रम्, हितोपदेशः।

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥**[1]

भाषायाः लक्षणं स्वीकुर्वन्तः विद्वांसः मन्यन्ते यत् 'भाष्यतेऽनयेति भाषा'। इयं सुरभारती, गीर्वाणवाणी संस्कृतभाषा सर्वदा सर्वथा सर्वेषामस्तीति, या भिन्न-भिन्न प्रान्तीयजनान् एकसूत्रे बध्नाति। इयं सहस्र-वर्षाणाम् अनन्तरमपि भारतीयसंस्कृति-संरक्षिका। सुरभारती स्वयं सुशोभिताऽपि षोड्शभाषाभिः सुशोभनीयं स्व स्वरूपम् आख्यापयति। भाषा च व्यवहाराधीना, व्यवहारेण एव भाषा शुद्धा परिष्कृता च भवति। यश्च निस्संकोचं व्यवहरेत्, दोषान् परिष्कर्तुं च यतेत, सः शीघ्रमेव भाषायामधिकारं प्राप्नुयात्। बहुष्वपि विश्वभाषासमुदायेषु संस्कृतभाषा अतिप्राचीना देवभाषा च। गीर्वाणभारती, मोक्षप्रदात्री, सुमधुरा, सुरम्या संस्कृतभाषा, इयं न तु भारत-भूखण्डे अपितु समग्रे विश्वे प्राचीनकालादारभ्य एतावत् पर्यन्तम् उत्तमोत्तमं स्थानमावहति इति नास्ति सन्देहः। प्रपञ्चेऽस्मिन् सर्वैः भारतीयैः पाश्चात्यैरपि प्रमाणीकृतं यदियं सर्वासां भाषाणां जननी। पुनः भारतीयसंस्कृत्या सह इदं संस्कृतं प्राचीनकालादारभ्य योजितमस्ति। अपि च श्रूयते यदस्ति संस्कृते तदस्ति अन्यत्र, यत्रास्ति इति संस्कृतिः संस्कृताश्रिता एव। संस्कृतभाषायाः प्रशंसायां मनुना उक्तम्-

**"एतद्देश-प्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥"**[2]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गीर्वाणवाणी गुणगौरवयुक्तैः भारतीयैः जगत्यस्मिन् चरित्रशिक्षकाः उत्पादिताः, ये अस्यां भाषायामेव स्वविचारान् प्रतिपादितवन्तः। भारतवर्षे याः भाषाः सम्प्रति भाष्यन्ते, पूर्वं वाऽभाषयन्त, तासु सर्वासु संस्कृतभाषा एव प्राचीनतमा, नास्त्यत्र कोऽपि सन्देहः। इयं संस्कृतभाषा देवैर्विद्वद्भिश्च प्रयुज्यमानत्वाद् देवभाषेत्युच्यते। संस्करणैः संस्कृतत्त्वाच्च संस्कृतमित्युच्यते।

मानवः एकः सामाजिकप्राणी अस्ति। शैशवावस्थातः एव मूल्ययुक्तया शिक्षया विशिष्टसामाजिकसांस्कृतिकसन्दर्भेण च तेषां सम्बन्धः वर्तते। एवं च वैज्ञानिकदृष्टिकोण–समानता–सहिष्णुता–पर्यावरणसंरक्षण–प्रजातन्त्र–स्वतन्त्रता–बन्धुत्व–धर्मनिरपेक्षता–स्वकर्त्तव्यपालन–कर्तव्यबोधश्चेत्यादीनां मूल्यानां प्रत्येकस्मिन् स्तरे नितरामावश्यकता भवति।

राजनीतिविज्ञानस्य अर्थशास्त्रस्य च सम्यक् ज्ञानं कौटिल्यार्थशास्त्रस्य अध्ययनेन प्राप्यते, यत्र राजोचितक्रियाकलापानां विवरणात्मिका आलोचना विहिता। तदनन्तरम् अस्यामेव भाषायां नीतिकथासाहित्ये पञ्चतन्त्रम्[3], हितोपदेशः[4], कथासरित्सागरः[5] इत्यादीनि प्रेरकाणि कथासाहित्यानि प्राप्यन्ते। संस्कृतकथासाहित्यपरम्परायाम् इतिहासमवलोकयामश्चेत् कथाभिः समाजे जीवनस्य परिस्थितिनामनुसारेण मूल्यानां संवर्धनं सम्प्रसारणं करोति। अद्य सर्वत्र समाजे सर्वासु दिक्षु नैतिक–सामाजिक–शैक्षिक–सांस्कृतिक आध्यात्मिकमूल्येषु क्षयः अवलोक्यते। अस्य क्षयस्य दुष्परिणामः शिक्षाक्षेत्रेऽपि दृश्यते। अतएव शिक्षानीतिकाराः पाठ्यक्रमे पाठ्यचर्यायां च मूल्यसंवर्धनपराः कथाः बालानां सुखबोधाय, हितोपदेशाय च प्राचीनसंस्कृतिबोधकाः कथाः योजयितुं शिक्षाविदः प्रेरयन्ति।

साहित्यस्य विविधविधासु संस्कृतसाहित्ये कथा एका महत्वपूर्णा विधा वर्तते। या छात्रेषु तर्कस्य, विश्लेषणस्य, निरीक्षणशक्तेश्च विकासं करोति, एवमेव तेषां मानसोप्पन्नानां जिज्ञासानां समाधानं कृत्वा अनुरञ्जनमपि करोति। अस्मात् कारणात् भाषाशिक्षणसमये कथानां पाठनं पाठ्यपुस्तके च पृथग्रूपेण भवति।

भारतीयज्ञानपरम्परायां कथासाहित्यस्य उद्गमः संस्कृतसाहित्यादेव अभवत्। गद्यकाव्यस्य भेदेषु एकः महत्त्वपूर्णः भेदः कथा अस्ति। सबन्धाधारेण अग्निपुराणे गद्यकाव्यस्य पञ्चभेदाः उद्दिष्टाः सन्ति। ते भेदा–

**आख्यायिका कथा खण्डकथा परिकथा तथा।**

**कथानिकेति मन्यन्ते गद्यकाव्यं च पञ्चधा।।**[6]

संस्कृतसाहित्ये कथासाहित्यमत्यन्तं महत्त्वपूर्णं लोकप्रियं च वर्तते। भारतीयज्ञानपरम्परायां संस्कृतसाहित्ये कथायाः रूपद्वयं प्राप्यते – आख्यायिका कथा च। परन्तु दण्डिमहाभागेन कथाऽऽख्यायिकयो भेदः नास्तीति स्वीकृतः। वस्तुतः कथायाः किमपि सुनिश्चितं निर्वचनं नास्ति। अस्य कारणमिदं यत् प्रकृतिरूपयोः वैविध्यं, तत्रागतं परिवर्तनं च। कथां प्रति मानवानामाकर्षणं जन्मतः भवति। शैशवकालात् बालकस्य रुचिः कथां प्रति ज्येष्ठैः संवर्ध्यते। प्राचीनकाले अस्माकं कथानामिदमुद्देश्यम् आसीत् यत् मनोरञ्जनेन सह समाजे नैतिकशिक्षायाः आचारशिक्षायाः च वृद्धिः। अतः बहव्यः कथाः उपदेशात्मिकाः सन्ति। परन्तु अद्यतनीयायाः कथायाः उद्देश्यं जीवने मनोरञ्जनाय वर्तते। अतः वर्तमानसमये कथाः केवलं मनोवैज्ञानिके धरातले एव वर्तन्ते।

वर्तमानसमये कथानां स्वरूपमधिकं विस्तृतं जातम्। कथायाः धाराः बहुप्रकारैः प्रवाहिताः। यथा– सामाजिक–राजनैतिक–दार्शनिक–नैतिक– रोमाञ्चकादयः। वर्तमानसमये कथायाः यावान् प्रचारः, प्रसारः अस्ति न तावान् अन्यस्य कस्यापि साहित्यस्य।

कथा एकं लघुवृत्तं भवति, यस्य पठनं स्वल्पसमये भवितुमर्हति। अनेन पाठकः अपि प्रभावितः भवति। कथा सम्पूर्णस्य जीवनकालस्य विषयः न भवति अपितु घटनायाः आंशिकं चित्रणं भवति। कथायाः विभिन्नतत्त्वानि कथानकं,

चरित्रचित्रणं, कथोपकथनम्, भाषा-शैली, शीर्षकम् एवञ्च उद्देश्यदृष्ट्या संस्कृतकथाः उच्चस्तरीयाः सन्ति। एतासां कथानकं क्रमबद्धैः जीवनोपयोगिपरिस्थितिभिश्च सह सम्बन्धितमस्ति। एतासु आदर्शभाषायाः प्रयोगः कृतः। भाषा अतीवा सरला सुग्राह्या च वर्तते। एताः कथाः जटिलभावानां स्पष्टीकरणे सहायिकाः भवन्ति। कथामाध्यमेन सांसारिकज्ञानस्य वृद्धिर्भवति। कथामाध्यमेन कल्पानाशक्तेः विकासः भवति। संस्कृतभाषायां कथासाहित्यस्य विकासः दृष्टिद्वयेन अभवत्। तत्र प्रथमः विशुद्धाय मनोरंजनाय अपरश्च नैतिकोपदेशाय।

**नीति-कथासाहित्यम्-** काश्चन तादृशाः कथाः विख्याताः सन्ति याः नवशिशुन् वा सामान्यजनान् नैतिकधार्मिकोपदेशप्रदानाय विकसिताः सन्ति। ताः कथाः नीतिकथाः उच्यन्ते। एतासु कथासु प्रायशः पशुपक्षी, जन्तुसम्बद्धाः कथाः भवन्ति। याभिः मानवः उपदेशग्रहणं कर्तुं शक्नुयात्। यदि पशु-पक्षि-जन्तवः तादृशीं बुद्धिमत्तां स्थातुं शक्नुवन्ति तर्हि नूनमेव मानवैः ताभ्यः कथाभ्यः शिक्षाग्रहणं कर्तुं शक्यते। एतासु कथासु पशु-पक्षि-जन्तूनां प्राध्यान्येन एताः कथा पशुकथाः नाम्नाऽपि कथ्यन्ते। एतासु सर्वासु कथासु कौतुहलायै रोचकतायै च छल-प्रपञ्च-प्रेम-विश्वासघात-स्वामीभक्ति-धर्म-नीति- सदाचार-व्यवहार-उत्साहवर्धकानां कार्याणां च विस्तरेण वर्णनं भवति। यैः मनोरंजनेन सह सदाचरणस्य नीतिपूर्णव्यवहारस्य च शिक्षां मानवः प्राप्नोति। एताः कथाः सरलसंस्कृतेन लिखिताः सन्ति। तथा च संस्कृतभाषाधिगन्तारः जनाः स्वभाषया सह स्वशिक्षायाः एवञ्च स्वकल्पनास्तरस्य विस्तररूपंप्रदानाय अवसरं प्राप्नोति।

वस्तुतस्तु एतासु कथासु मानकः सत्पात्रः भवेत् विषयेऽस्मिन् बलं प्रदीयते। एतादृशानां कथानां मूलोद्देश्यं नैतिकोपदेशप्रदानं भवति तथापि आनुषङ्गिकानि अपि बहूनि उद्देश्यानि भवन्ति। तद्यथा विवेकस्य जागरणं, धर्माधर्मयोः विचारः, कर्तव्याकर्तव्योः विचारश्च भवति। वस्तुतस्तु लोकव्यवहारे पटुताप्रदानेन सह मानवेषु आदर्शवादस्य जागरणं नीतिकथायाः लक्ष्यं भवति। अस्यां राजनीति-सदाचारयोः उभयोः शिक्षा प्रदीयते। तथा च एतादृशी कथा-गद्य-पद्य समन्विता सरलशैल्यां विलिखिता रोचकता परिपूर्णा च भवति। संस्कृत-शिक्षारम्भकाणां कोमलमतिमतां बालकानां कृते एताः कथाः सर्वथा उपादेयाः पाथेयाश्च भवन्ति।

यथा केनापि नीतिकथाकारेण स्वग्रन्थस्य उपयोगितायाः विषये निगदितं यत्-

**श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु।**
**वाचा सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च॥**[7]

नीतिकथाः सम्बद्धाः ये प्रमुखाः ग्रन्थाः प्राप्यन्ते ते भवन्ति - पंचतन्त्रम्, तत्राख्यायिका, सरल पंचतन्त्रम्, दक्षिण-भारतीय-पञ्चतन्त्रम्, हितोपदेशादयश्च। मुख्यत्वेन पंचतन्त्रम्- हितोपदेशश्च इत्युभौ नीतिकथायां प्रमुखौ स्तः। अत्र नीतिकथायाः द्वयोः ग्रन्थयोः परिचयः संक्षेपेण समुपस्थाप्यते।

**पञ्चतन्त्रम्-** नीतिकथाग्रन्थेषु सर्वप्राचीनः कथाग्रन्थः पञ्चचतन्त्रम् अस्ति। अयं कथाग्रन्थः विष्णुशर्मणोऽस्ति। कथानकग्रन्थोऽयं मुख्यरूपेण गद्यात्मकोऽस्ति। परन्तु कथायाः निष्कर्षरूपेण पद्यानामपि बहुधा प्रयोगः अस्ति। प्रायशः पद्येषु सूक्तयः सन्ति, तेषां सूक्तीनां पाठकाः यदि कण्ठस्थं आत्मसात च कुर्वन्ति, तदा ते नीतिशास्त्रे प्रवीणतां प्राप्तुं शक्नुवन्ति। अस्य ग्रन्थस्य लेखकेन विष्णुशर्मणा राजा अमरशक्तेः पुत्रान् राजनीतौ पारङ्गतां प्रदातुं विलिखितम्।

ग्रन्थोऽयं पञ्चसु भागेषु विभक्तोस्ति। एतानि पञ्चभागेषु विभक्तानि तन्त्राणि एवं 'तन्त्रम्' इति नाम्ना अवबुध्यते। तानि च तन्त्राणि **मित्रभेदः मित्रसम्प्राप्तिः, काकोलुकीयः, लब्ध-प्रणाशः, अपरिक्षितकारकं** चेति भवन्ति। वस्तुतस्तु ग्रन्थेऽस्मिन् नीतिसम्बद्धानि गुरुतत्वानि श्रीमता विष्णुशर्मणा विलिखितानि।

**हितोपदेशः-** पञ्चतन्त्रान्तरं नीतिकथासु सर्वाधिकं प्रचलितं प्रसिद्धश्च कथा-साहित्यं हितोपदेशः अस्ति। अस्य रचनाकारः नारायणः पंडितः। विद्वद्भिः अस्य कथासाहित्यस्य रचनाकारः चर्तुदशशताब्दी इति स्वीक्रियते। एतत् कथासाहित्यं चतुर्षु भागेषु विभक्तमस्ति। ते च भागाः सन्ति मित्रलाभः, सुहृदभेदः, विग्रहः, सन्धिश्च। अस्मिन् प्रायशः उनचत्वारिंशत् (39) कथाः सन्ति। प्रत्येकं भागे आदौ एका मुख्याकथा वर्तते, तेषां चर्तुणां मुख्यकथानां संयोजनेन त्रयः चत्वारिंशत् कथाः अस्मिन् साहित्ये भवन्ति। पञ्चतन्त्रम् इव अस्मिन् कथया सह निष्कर्षत्वेन पद्यानि अपि प्रयुक्तानि सन्ति। एवञ्च लघु-प्रस्ताविका अपि अस्मिन् संयोजिता अस्ति। प्रायशः षडविंशत्युत्तरसप्तशतं पद्यानि अस्मिन् सन्ति। वस्तुतस्तु पञ्चतन्त्रम् इति कथासाहित्यस्य या शैली वर्तते तां शैली एव स्वीकृत्य अयं ग्रन्थः नारायण-पण्डितेन विलिखितः। उभयोः मध्ये भेदः अयं प्रतीयते यत् पञ्चतन्त्रम् इति ग्रन्थापेक्षया अस्मिन् अधिकानि पद्यानि सन्ति।

कानिचन पद्यानि तु कामन्दकीयनीतिसारात् संकलितानि सन्ति। अस्य कथासाहित्यस्य प्रस्ताविकायां पाटलीपुत्रमिति नगरस्य राज्ञः सुदर्शनस्य चतुर्भ्यः मूर्खपुत्रेभ्यः विष्णुशर्मणा नीतिशास्त्रस्य दीयमानायाः शिक्षायाः कथाः सन्ति। तत्र प्रथमे मित्रलाभे काक-कच्छप-मृग-मूषक-वृद्ध-व्याघ्र-शृगाल- बिडाल-भैरवव्याध-सर्वादिभिश्च सम्बन्धिताः कथाः वर्णिताः सन्ति। सुहृदयभेदः इत्यस्मिन् द्वितीये भागे सिंहवृषभयोः मित्रतायाः अग्नस्य कथया सह अनधिकृतचेष्टासम्बद्धाः कथाः एवञ्च गर्दभ-कुक्कुर-मूषक- दधिकर्ण-सन्यासी-व्यभिचारिणी-स्त्री-कृष्णसर्पादीनां कथानां वर्णनमस्ति।

विग्रह इत्यस्मिन् भागे हिरण्यगर्भनामकः राजहंसः तथा च चित्रवर्णनामकः मयूरः इत्युभाभ्यां साकं मन्त्रिणा उपाख्यानं तथा च शशकः-हस्त्योः कथा, हंसकाकपथिकानां कथा, व्यभिचारिणी-स्त्री इतस्या कथा, निलवर्णे रञ्जितस्य शृगालस्य कथा एवञ्च क्षत्रियनापितयोः कथाः वर्णिताः सन्ति। अनेन प्रकारेणैव हंसमयूरयोः मेलनस्य कथा, हंसद्वयोः एवञ्च तस्य स्नेहकस्य कच्छपस्य कथा, दूरद्रष्टी मत्स्योः कथा, बकसर्पनकुलानां कथा, महातपनामकः यतेः मूषकस्य कथा, देवशर्मनामकब्राह्मणकुम्भकारयोः कथा, सुन्दोपसुन्दयोः कथा, ब्राह्मण-अजा-त्रयाणां धूर्तानां कथा, मन्दोत्कटनामकस्य सिंहस्य एवञ्च सेवकानां कथा तथा च माधव-ब्राह्मणः बालकनकुलसर्पयोः कथाश्च वर्णिताः सन्ति। एतासु कथासु सप्तकथाः पशुकथाः, कथात्रयं लोककथाः तथा च कथाद्वयं शैक्षिककथा एवञ्च पञ्चकथा षडयंत्रपरकाः कथाः सन्ति। अस्य लोककथासाहित्यस्य भारतीयभाषासु अन्यासु अपि वैदेशिकभाषासु बहूनि संस्करणानि प्रकाशितानि सन्ति। प्रारम्भिकसंस्कृताधिगमनाय पाठ्यपुस्तके अपि अस्य साहित्यस्य कथा सङ्कलिताः संयोजिताश्च सन्ति। अस्य पद्यानि अपि वार्तालापक्रमेण जनैः मुख्यैश्च उद्धृतानि सन्ति।

**सारांशः**-कथायाः विभिन्नतत्त्वानि कथानकं, चरित्रचित्रणं, कथोपकथनम्, भाषा-शैली, शीर्षकम् एवञ्च उद्देश्यदृष्ट्या नीतिकथाः उच्चस्तरीयाः भवन्ति। एतासां कथानकं क्रमबद्धैः जीवनोपयोगिपरिस्थितिभिश्च सह सम्बन्धितम् भवन्ति। तथा च कथा-गद्य-पद्य समन्विता सरलशैल्यां विलिखिता रोचकतापरिपूर्णा एवञ्च जटिलभावानां स्पष्टीकरणे सहायिकाः भवन्ति। नीतिकथासु कौतुहलाय रोचकतायै च छल-प्रपञ्च-प्रेम-विश्वासघात-स्वामीभक्ति-धर्म-नीति- सदाचार-व्यवहार-उत्साहवर्धमानां कार्याणां च विस्तरेण वर्णनं भवन्ति। यैः मनोरञ्जनेन सह सदाचरणस्य नीतिपूर्णव्यवहारस्य च शिक्षां मानवः प्राप्नोत्येव।

सन्दर्भग्रन्थाः


1. महाभारतम् शान्तिपर्व 2.31.56
2. मनुस्मृति 2.20
3. पं. विष्णुशर्मणः रचित नीतिकथासाहित्यम्
4. नारायणपंडित विरचितस्य नीतिकथासाहित्यम्
5. सोमदेव विरचितस्य नीतिकथासाहित्यम्
6. आग्नेये महापुराणेऽलङ्कारे काव्यादिलक्षणं नाम प्रथमोऽध्याये 1–11
7. संस्कृत का इतिहास पृ.429